# Karavanamahatmyam Athava Lakulishamahatmyam

# કારવણમાહાત્મ્યં અથવા લકુલીશમાહાત્મ્યમ્

## Document Information

Text title : Karavanamahatmyam

File name : kAravaNamAhAtmyam.itx

Category : shiva, vAyupurANa, mAhAtmya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : vAyupurANa

Latest update : September 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 2, 2025

*sanskritdocuments.org*

# કારવણમાહાત્મ્યં અથવા લકુલીશમાહાત્મ્યમ્

ગાયકવાડ પ્રાચ્ય ગ્રન્થમાલા ક્રમાઙ્ક ૨૫ (સન્ ૧૯૨૦)મેં ગણકારિકા પ્રકાશિત હુઇ થી ।
લકુલીશ પાશુપત મત કા યહ એકમાત્ર ઉપલબ્ધ ગ્રન્થ હૈ । ઇસ મેં ચૌથ પરિશિષ્ટ કે રૂપ મેં કારવણમાહાત્મ્ય કા મૂલપાઠ દિયા ગયા હૈ । તુલનાત્મક અધ્યયન કે લિયે ઉપયોગી સામગ્રી કે રૂપ મેં હમ ઉસે કિઞ્ચિત્ સઙ્ક્ષેપ કે સાથ ઉદ્ધૃત કર રહે હૈં ।

કારવણમાહાત્મ્ય મેં ભગવાન્ શિવ કે જન્મ કી કથા કહી ગયી હૈ । ઉલ્કાપુરી કે એક બ્રાહ્મણ કે પુત્ર કે રૂપ મેં કારવણ ક્ષેત્ર મેં લકુલીશ કે રૂપ મેં ભગવાન્ કા જન્મ હુઆ । ઇસમેં પૂજાવિધિ ઔર પટ્ટબન્ધ કા માહાત્મ્ય કહા ગયા હૈ । ઇસ મેં ચાર અધ્યાય હૈં । પહલે કા સમ્બન્ધ વાયુપુરાણ સે, શેષ તીન કા શિવપુરાણ સે જોડ઼ા ગયા હૈ ।

## પ્રથમોઽધ્યાયઃ । શિવપ્રસૂતિસર્ગઃ ।

- કથાસઙ્ક્ષેપ એવં સઙ્ક્ષિપ્ત મૂલપાઠ
આરમ્ભ મેં લકુટપાણીશ કે રૂપ મેં અવતરિત શિવ કી વન્દના કો ગઈ હૈ । ફ઼િર શિવ ઔર પાર્વતી મેં એક વાર્તાલાપ હૈ, જિસમેં પાર્વતી પટ્ટબન્ધ કા માહાત્મ્ય પૂછતી હૈં । શિવ કલિ ઔર દ્વાપર કે મધ્ય મેં અપને અવતાર કી કથા સુનાતે હૈં ।

અત્રિ ઋષિ કે વંશજ વિશ્વરૂપ નામ કે બ્રાહ્મણ ઔર ઉસકી પત્ની સુદશના કે યહાઁ ચૈત્ર શુક્લ ચતુર્દશી કો પિઙ્ગલાક્ષ પિઙ્ગકેશ વાલે બાલક કા જન્મ હુઆ । ઉસકે શરીર કા વર્ણ તપ્ત કાઞ્ચન જૈસા થા । શ્રાવણ કે અન્ત મેં સૂર્યગ્રહણ કે ઉપલક્ષ્ય મેં બ્રાહ્મણ કુરુક્ષેત્ર કા યાત્રા કે લિયે ગયા ઓર પત્ની કો અગ્નિહોત્ર સૌમ્પકર ગયા ।

અમરગણનિષેવ્યઃ સર્વસિદ્ધિપ્રદાતા
કલિયુગમવતીર્ણઃ કાર્યરૂપો મહેશઃ ।
સકલભુવનકર્તા સર્વપાપપ્રહર્તા
દિશતુ લકુટપાણિર્વો વિભૂતિં પ્રસન્નઃ ॥

કૈલાસશિખરારૂઢં ભગવન્તં ત્રિલોચનમ્ ।
મહાદેવં મહાકાલં મહાભૈરવરૂપિણમ્ ॥

એકાકિનં પ્રભું દૃષ્ટ્વા પપ્રચ્છ પાર્વતી તદા ।
શ્રીદેવ્યુવાચ -
પટ્ટબન્ધસ્ય માહાત્મ્યં વિસ્તરાત્ કથય પ્રભો ।
ઈશ્વર ઉવાચ -
કલિદ્વાપરયોર્મધ્યે અવતારં મમ શૃણુ ।
યસ્ય સ્મરણમાત્રેણ મુચ્યતે સર્વપાતકૈઃ ॥

અત્રિનામા તુ દેવર્ષિઃ પૂર્વં ખ્યાતો મહાતપાઃ ।
તદન્વયે પ્રસૂતોઽસૌ વિશ્વરૂપો મહાદ્વિજઃ ॥

સુદર્શનસ્તુ દેવેશિ ! તસ્ય પત્ની સુદર્શના ।
સર્વલક્ષણસમ્પન્ના રૂપલાવણ્યસંયુતા ॥

હર્ષગદ્ગદસમ્ભાષાં મત્તમાતઙ્ગગામિની ।
સમ્પૂર્ણેન્દુમુખી સુભ્રૂઃ કુરઙ્ગચકિતેક્ષણા ॥

પતિવ્રતધરા સાધ્વી પત્યુરાદેશકારિણી ।
યથા રૂપં તથા શીલં સાધ્વીનાં ધુરિ કીર્ત્તિતા ॥

બ્રહ્મરાત્ર્યવસાને તુ પ્રથમે ચ ચતુયુગે ।
અવતીર્ણો હ્યયં મર્ત્યે ઉલ્કાગ્રામે વિલોમતઃ ॥

વીરભદ્રો ગણો નામ . . . . તસ્ય વરાનને ।
તસ્ય ચૈકાગ્રતો ભક્તેરવતીર્ણો સ્વયં તતઃ ॥

ઉપપન્નસ્તતો ગર્ભે માસિ ભાદ્રપદે તદા ।
દેવકાર્યસ્ય કાર્યાર્થં મર્ત્યલોકે વરાનને ।
એવં ચૈવાશ્વિનો માસસ્તથા વૈ કાર્ત્તિકો ગતઃ ॥

અથ માર્ગશિરોમાસસ્તથા પૌષઃ પ્રકીર્તિતઃ ।
માઘમાસો ગતો દેવિ તથા વૈ ફાલ્ગુનઃ સ્મૃતઃ ॥

સમ્પ્રાપ્તે ચૈત્રમાસે તુ શુક્લપક્ષે ચતુર્દશી ।
અર્ધરાત્રે વ્યતીતે તુ પ્રસૂતા સા કુલાઙ્ગના ॥

સૂતિકાસ્થા મહાદેવિ મહાસત્યવતી સતી ।
અપશ્યદાત્મનો બાલં જાતમાત્રં વરાનને ॥

પિઙ્ગાક્ષં પિઙ્ગકેશં ચ તપ્તકાઞ્ચનસન્નિભમ્ ।

સુદૃઢં બાહુયુગલમ્મૂરૂ ચ સુદૃઢૌ તથા ॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . .

સ્વજના બાન્ધવા યે ચ શ્યાલાઃ સમ્બન્ધિનસ્તદા ।
વિદ્યાર્થિનસ્તુ યે વિપ્રા યે ચાન્યે આશ્રિતા જનાઃ ॥

કૃતાઞ્જલિઃ પુરો ભૂત્વા બાલં યત્નેન રક્ષત ।
એવં સમર્પયન્ બાલં કુરુક્ષેત્રં પ્રતસ્થિવાન્ ॥

ઇતિ શ્રીવાયુપુરાણે શિવપ્રસૂતિસર્ગઃ (પ્રથમઃ) સમ્પૂર્ણઃ ॥

## દ્વિતીયોઽધ્યાયઃ । સન્તોષકરણમ્ ।

-કથાસઙ્ક્ષેપ એવં મૂલપાઠ કા આદિ-અન્ત

આશ્વિન માસ મેં એક દિન પ્રાતઃ બ્રાહ્મણી અગ્નિ પર ઘૃત ડાલ કર એક બ્રાહ્મણ કો બુલાને ગઈ । લૌટ કર ઉસને દેખા કિ અગ્નિ ઠીક સે પ્રજ્વલિત હૈ ઔર અગ્નિહોત્ર કી વિધિ સમ્પન્ન હો ચુકી હૈ । ઉસે બહુત આશ્ચર્ય હુઆ । ફિર પ્રત્યેક રાત્રિ મેં વહ ઇસ શિશુ દ્વારા ઇસ કૃત્ય કી પુનરાવૃત્તિ દેખતી રહી । તીર્થયાત્રા સે પતિ કે લૌટને પર ઉસને યહ આશ્ચર્ય વૃત્તાન્ત કહ સુનાયા । માતા-પિતા ને શિશુ કો અગ્નિ મેં આહુતિ દેતે દેખા ।

અતઃ પરં પ્રવક્ષ્યામિ કુમારચરિતં પરમ્ ।
યન્ન કસ્યચિદાખ્યાતં તત્સર્વં કથયામિ તે ॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . .

સમીપે ચ ગૃહં ગત્વા ઉપસૃત્ય ચ સુન્દરિ ।
એકાગ્રઃ પ્રયતો ભૂત્વા મુહુસ્તિર્યઙ્ નિરીક્ષયન્ ॥

પર્યઙ્કાદુત્થિતો બાલઃ પ્રેમં (?)દત્ત્વા યથા વ્રજન્ ।
પુનસ્તત્રૈવ ગચ્છન્તૌ દમ્પતી તદનન્તરમ્ ॥

ઇતિ શ્રીશિવપુરાણે લકુલીશમાહાત્મ્યે સન્તોષકરણં
નામાધ્યાયઃ (દ્વિતીયઃ) સમ્પૂર્ણઃ ॥

## તૃતીયોઽધ્યાયઃ ।

-કથાસઙ્ક્ષેપ એવં સઙ્ક્ષિપ્ત મૂલપાઠ

બાલક જબ અગ્નિહોત્ર પૂરા કર ચુકા તબ માતા-પિતા ને ઉસસે પૂછા –પુત્ર તુમ થક તો નહીં ગએ હો ? ઉનકે ઇતના કહતે હી શિશુ મૂર્ચ્છિત હો કર પઞ્ચત્વ કો પ્રાપ્ત હો ગયા । માતા પિતા ને મૃત શિશુ કો દેવખાત નામક

બડ઼ે જલાશય મેં વિપુલ જલ મેં ડાલ દિયા । કચ્છપ ઉસે જલેશ્વર દેવ કે પાસ લે ગયે (જલેશ્વર = જલ મેં સ્થિત મહાલિઙ્ગ)। તીરસ્થ બ્રાહ્મણોં ને બાલક કો ઇસ પ્રકાર ખેલતે દેખ કર મહાન્ આશ્ચર્ય કિયા ઔર ઉસે પુકાર કર પૂછા તુમ કૌન હો ? . . . . સ્તુતિ . . . . ।

ઈશ્વર ઉવાચ -
તતઃ પ્રભાતસમયે તથા દૃષ્ટ્વા તુ પાર્વતિ !
આહતુસ્તૌ વિશાલાક્ષં પુત્ર ! શ્રાન્તોઽસિ કો ભવાન્ ?
ઇતિ વાક્યાવસાને તુ મૂર્ચ્છિતઃ પતિતો ભુવિ ।
મૂર્ચ્છિતં ચ સુતં દૃષ્ટ્વા વિસ્મિતા ચ સુદર્શના ॥

દિશો નિરીક્ષણ કૃત્વા પતિતા ધરણીતલે ।
સપ્તમાસસ્તુ દેવેશિ ! સુતઃ પઞ્ચત્વમાગતઃ ॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . . .

ઋષય ઊચુઃ -
બાલસ્ય ચરિતં દૃષ્ટ્વા ઋષયો વિસ્મયાન્વિતાઃ ।
બ્રૂહિ ત્વં કો ભગવાન્ ? કસ્ય ? સત્યધર્મપરાયણઃ ॥

બાલ ઉવાચ -
ક્ષિતિજલપવનેભ્યસ્તેજસશ્ચૈવ દેશાદ્-
ઉપચિતનરવેશઃ સમ્ભવો દ્રવ્યરાશિઃ ।
શ્રવણનયનજિહ્વાઘ્રાણસંસ્પર્શવેત્તા
ક્ષિતિતલપરિવર્તી કોઽપ્યહં પ્રાણધર્મઃ ॥

ઋષય ઊચુઃ -
નમો બાલકરૂપાય અવ્યક્તાય નમો નમઃ ।
વ્યોમપ્રમાણકાયાય કામેશાય નમો નમઃ ॥

વ્યોમપ્રમાણવિદ્યાય વિદ્યેશાય નમો નમઃ ।
વ્યોમપ્રમાણકાલાય કાલેશાય નમો નમઃ ॥

વ્યોમપ્રમાણધર્માય ધર્મેશાય નમો નમઃ ।
વ્યોમપ્રમાણવિશ્વાય વિશ્વેશાય નમો નમઃ ॥

એકવજ દ્વિવજાય બહુવજાય તે નમઃ ।
એકકણ્ઠદ્વિકણ્ઠાય બહુકણ્ઠાય તે નમઃ ॥

એકહસ્તદ્વિહસ્તાય બહુહસ્તાય તે નમઃ ।

એકત્રદ્વિનેત્રાય બહુનેત્રાય તે નમઃ ॥

નમસ્તેઽસ્તુ મહાદેવ ! નમસ્તેઽસ્તુ મહેશ્વર !
નમસ્તેઽસ્તુ મહારુદ્ર ! નમસ્તે બાલરૂપિણે ॥

નમસ્તેઽસ્તુ મહાસિદ્ધ ! દેવખાતસમુદ્ભવ !
નમસ્તેઽસ્તુ મહારુદ્ર ! નમસ્તેઽસ્તુ સદા હરે ॥

અવ્યક્તાય નમસ્તુભ્યં શાશ્વતાય ચ તે નમઃ ॥

એવં સ્તવેન દેવેશં સ્તૌતિ યો લકુડેશ્વરમ્ ।
સ મુક્તઃ સર્વપાપેભ્યો શિવલોકે મહીયતે ॥

ભોગાર્થી લભતે ભોગાન્ યોગાર્થી યોગમાપ્નુયાત્ ।
યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ સત્વરમ્ ।
શિવસ્ય પદમાપ્નોતિ નિત્યં પઠતિ યો નરઃ ॥

ઇતિ શ્રીશિવપુરાણે લકુલીશમાહાત્મ્યે તૃતીયોઽધ્યાયઃ ॥

## ચતુર્થોઽધ્યાયઃ । તીર્થાનુક્રમણિકાયાં શૂલપાણિજન્મપટ્ટબન્ધાદિમાહાત્મ્યમ્ ।

- કથાસઙ્ક્ષેપ એવં સઙ્ક્ષિપ્ત મૂલપાઠ
યં ચારુચામીકરરાશિગૌરં
સંસ્કારવિદ્યાવ્રતમન્ત્રધૌતાઃ ।
સમાવિશન્તિ પ્રતિગૃહ્ય કાયં
લોકપ્રવીરાય નમોઽસ્તુ તસ્મૈ ॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . .

પ્રકાશયત્સ્વરૂપં ચ દિવ્યં ત્રૈલોક્યમોહનમ્ ।
ત્રિનેત્રં ચ સુદીપ્તં ચ મુક્તકેશઞ્ચ સુવ્રતે ॥

ધૃતયજ્ઞોપવીતં ચ મેખલાભસ્મસંયુતમ્ ।
પ્રહૃષ્ટમનસઃ સર્વે નિત્યં પ્રોત્ફુલ્લલોચનમ્ ॥

ઋગ્યજુઃસામસમ્બન્ધૈર્દિવ્યાભિઃ સ્તુતિસંયુતૈઃ ।
સ્તોત્રૈર્મનોરમૈઃ સ્તુત્વા ધાવમાનં પુનઃ પુનઃ ॥

હર્ષગદ્ગદયા વાચા સમ્ભાવ્ય તં ચ બાલકમ્ ।
કૃતાઞ્જલિપુરાઃ સર્વે સ્તુતિ સમુપચક્રમુઃ ॥

. . . . . . . . . . . . . . . . . . . . . . . . . . .
ફિર ઋષિયોં ને પિતા કી પ્રશંસા કી । તબ બાલક ઉન સબ કે આગે-આગે ભાગને લગા । ક્ષણમાત્ર અદૃશ્ય હો કર -

ઊર્વા નામ્ના તુ યા દેવી નદીનામ્ના સરસ્વતી ।
ભૃગુક્ષેત્રોપકારાય ત્રિષુ લોકેષુ વિશ્રુતા ॥

નદીતીરે ગતો બાલઃ ક્રીડમાનસ્તુ તિષ્ઠતિ ।
તતઃ પશ્ચિમમાર્ગેણ શ્રીમત્કાયાવરોહણમ્ ॥

. . . . . . . . . . . . . . . . . . . . . . . . . . .
સભી બ્રાહ્મણ, સ્વજન વિકલ હો કર બાલક કો ખોજને લગે । કિન્તુ લકુલીશ વાયુવેગ સે ચક્રપુર પહુઁચ ગયે । સભી લોગ રોતે-બિલખતે પીછે-પીછે દૌડ઼કર બુલાતે રહે । તબ બાલક ને કહા -

કુમાર ઉવાચ -
મા મા સ્પૃશન્તિ મુનયો મમ માતા પિતા તથા ।
અસ્તિ કાર્યં પરં કિઞ્ચિત્ શ઼ૃણ્વન્તુ મુનિસત્તમાઃ ॥

ત્યજ શોકં વિશાલાક્ષિ ! ન મે માતા કદાચન ।
શ઼ૃણ્વન્તુ ઋષયઃ સર્વે ઇતિહાસં પુરાતનમ્ ॥

અહં સર્વજગદ્વ્યાપી સ્વયં સાક્ષાન્મહેશ્વરઃ ।
ઋષીણાં વરદાનાય ઉલ્કાગ્રામે મહર્ષયઃ ॥

પ્રકાશાય દ્વિજાતીનાં ધર્મસંસ્થાપનાય ચ ।
અવતીર્ણઃ સ્વયં દેવિ ! તં વેદ માં પુરાતનમ્ ॥

ઋષય ઊચુઃ -
ત્વં દેવઃ સર્વદેવાનાં કર્તા હર્તા જગત્પતિઃ ।
ભુક્તિમુક્તિપ્રદાતા ત્વં ભોગમોક્ષમભીપ્સિતમ્ ॥

કિં પુણ્યં કે ગુણાસ્તસ્ય યેન દેવિ (?)પ્રશંસતિ ।
ઉલ્કાગ્રામસ્ય માહાત્મ્યમશેષં કથય પ્રભો ! ॥
તબ ઉન સબ કે અનુરોધ પર બાલક ને ઉલ્કાગ્રામ કા માહાત્મ્ય કહા, ઉસે શિવક્ષેત્ર બતાકર વહીં સ્થિત દેવહ્રદ મેં ગઙ્ગા-સરસ્વતી-તાપી-યમુના-નર્મદા-સરયૂ ઇત્યાદિ સભી કા સમાવેશ બતાયા ઔર કહા કિ ઉન સબ કે સ્નાનાદિ કા ફલ યહાઁ મિલ જાતા હૈ । ઇસકે બાદ -
ઈશાનશ્ચોત્તરેશાને ભાલાક્ષો દેવતાગણૈઃ ।
પૃષ્ઠભાગે પુનર્દૃષ્ટ્વા જનનીજનકાદયઃ ॥

તતો મયા ધૃતઃ કોણઃ ભ્રુકુટીકુટિલાનનમ્ ।
તતો મે ભૃકુટીં દૃષ્ટ્વા સ ઋષિર્દીનમાનસઃ ॥

વિચેતનઃ પુનર્જાતઃ પુનરાશ્વાસિતો મયા ।
અત્રૈવ સ્થીયતાં બ્રહ્મન્ ! આવયોઃ સઙ્ગકારણમ્ ।
મયા તુ દણ્ડકાષ્ઠેન નદીનામા તુ જાહ્નવી ॥

આનીતા જાહ્નવી પુણ્યા પુણ્યતોયાવગાહિતા ॥

સર્વતીર્થમયી પુણ્યા દેવખાતેષુ દુર્લભા ।
દીર્ઘા રેખા કૃતા યસ્માત્ તેનેય દીર્ઘિકા સ્મૃતા ॥
દીર્ઘિકા કે પાસ વૃદ્ધદેવ કા સ્થાન થા । બાલક ને વહીં આશ્રય માઁગા, કિન્તુ વૃદ્ધદેવ ને કહા -
મમૈતત્સઙ્કુટસ્થાનં કથં તર્હ્યાવયોર્ભવેત્ ।
બાલક ને ફિર ભી આગ્રહ કિયા, કિન્તુ વૃદ્ધદેવ ને કહા કિ તુમ બ્રહ્મેશ્વર કે સમીપ બ્રહ્મતીર્થ મેં જાઓ ।
શ્રીમહાદેવ ઉવાચ -
વૃદ્ધસ્ય વચનં શ્રુત્વા લકુલીશો વરાનને ।
બ્રહ્મેશ્વરં સમાસાધ્ય તસ્મિન્નેવ લયં ગતઃ ॥

સ્થિતઃ સ ભગવાન્ તત્ર કાયરૂપી મહેશ્વરઃ ।
યેન કાયાવતારોઽસૌ તેનેદં કાયરોહણમ્ ॥

અસિદણ્ડધરો વામે દક્ષિણે બીજપૂરકમ્ ।
બ્રહ્મલિઙ્ગે મહાદેવિ ! અહમપિ લયં ગતઃ ॥

કાયાવરોહણે પુણ્યે તીર્થે તીર્થવરોત્તમે ।
ભૃગુક્ષેત્રપવિત્રાર્થમવતીર્ણો યુગે યુગે ॥

આદિકલ્પાવસાને તુ બ્રહ્મકલ્પે પુરાતને ।
બ્રહ્મણો મનસઃ પુત્રો અત્રિનામા ચ વિશ્રુતઃ ॥

અત્રિસ્તુ જનયામાસ આત્રેયં નામ નામતઃ ।
આત્રેયાદગ્નિશર્મોઽપિ અગ્નિશર્મસુતઃ શુચિઃ ॥

સોમશર્મેતિ વિખ્યાતો ધર્મશીલો જિતેન્દ્રિયઃ ।
સોમશર્મસુતો જાતો વિશ્વરૂપો દ્વિજોત્તમઃ ॥

વિશ્વરૂપાદહં જાતો બાલરૂપધરો હરઃ ।
યેન વ્યાપ્તં જગત્સર્વં ત્રૈલોક્યં સચરાચરમ્ ॥

જગત્પ્રાણસ્વરૂપોઽહં જન્તૂનાં જીવલક્ષણમ્ ।
યોગિનાં પરમં બ્રહ્મ બ્રહ્મણા પરિકીર્તિતમ્ ॥

તન્માં વિદ્ધિ મહાદેવિ ! વિશ્વરૂપં જગદ્ગુરૂમ્ ।
ચરાચરેષુ વિખ્યાતં દેહિનાં દેહમાશ્રિતમ્ ॥

સમાનો નામ યો વાયુર્ભૂતાનાં વિષયાત્મવાન્ ।
તત્રોત્પન્નશ્ચ તત્રૈવ મયા સઙ્ક્રમણં કૃતમ્ ॥

લમ્બકસ્તુ સમાનસ્યાવ્યાપકસ્તુ વ્યવસ્થિતઃ ।
આત્મરૂપસમાનસ્ય પ્રાણિનાં પરમઃ શિવઃ ॥

અવતીર્ણસ્તતો મર્ત્યે કાયરૂપધરો હરઃ ।
કાયાવતારે લોકેશો લોકાનાં હિતકામ્યયા ॥

ઈશ્વર ઉવાચ -
ઈશાનઃ પ્રથમે જાતો દ્વિતીયે તુ મહાબલઃ ।
તૃતીયે તુ યુગે જાતો વૃદ્ધદેવો મહેશ્વરઃ ॥

પ્રાપ્ત કલિયુગે ઘોરે ધર્મસંસ્થાપનાય ચ ।
સવપાપહરં પુણ્યં શ્રીમત્કાયાવરોહણમ્ ॥

કોટિલિઙ્ગસ્ય સંસ્થાનં શિવક્ષેત્રેણ નિર્મિતમ્ ।
સર્વં તીર્થમિદં દેવિ ! વિખ્યાતં ભૃગુમણ્ડલે ॥

શ્રીમત્કારવણે તીર્થે મૂર્તિમાન્ શઙ્કરઃ સ્વયમ્ ।
ચાતુર્યુગમિદં તીર્થં શિવશક્ત્યા સમન્વિતમ્ ॥

ભૃગુક્ષેત્રપવિત્રાર્થં નિર્મિતં શમ્ભુના સ્વયમ્ ।
કૃતે ઇચ્છાપુરી નામ ત્રેતાયાં ચ મયાપુરી ॥

દ્વાપરે મેઘવતી નામ કલૌ કાયાવરોહણમ્ ।
શ્રીમાતેતિ કૃતે પ્રોક્તા ત્રેતાયાં ભૂલમ્બા મતા ॥

આદૌ ચાન્તે મહાદેવિ ! મૂર્તિમન્તૌ મહેશ્વરૌ ।
લિઙ્ગમૂર્ત્તી દ્વયોર્મધ્યે સ્વયં સાક્ષાદ્યુગેશ્વરઃ ॥

ઈશાનં કૃત્તિકાનાથં સાનન્દં લકુલીશ્વરમ્ ।
પશ્યન્તિ યે નરા નિત્યં તે નરા ગતકલ્મષાઃ ॥

ઈશાનં પ્રવરં તોર્થમીશાનો યત્ર તિષ્ઠતિ ।

પ્રવરઃ સર્વદેવાનાં સર્વપાપોપશાન્તિદઃ ॥

ઈશાનઃ સર્વતન્ત્રેષુ સર્વતન્ત્રેષુ નાયકઃ ।
ઈશાનઃ સર્વદેવશ્ચ તસ્માદીશાનો વૈ પ્રભુઃ ॥

તમીશાનં સમાસાધ્ય વિધિના શ્રદ્ધયા સહ ।
શિવોક્તેન ચ મન્ત્રેણ પૂજયિત્વા જગદ્ગુરુમ ॥

પ્રદક્ષિણં તતઃ કૃત્વા પૂજયિત્વા મહેશ્વરમ્ ।
પ્રાપ્નોતિ પરમં સ્થાનં ભુક્તિમુક્તિફલપ્રદમ્ ॥

મહાબલં તતસ્તીર્થં યત્ર તપ્તં તપઃ પુરા ।
ઋષિભિર્દેવમુખ્યૈશ્ચ પરં મોક્ષમભીપ્સુભિઃ ॥

પુરા ત્રેતાયુગે દેવિ ! તીર્થે તીર્થવરોત્તમે ।
સાલઙ્કાય (?)પૌત્રેણ નન્દિના ભાવિતાત્મના ॥

આરાધ્ય તપસા તેન દિવ્યં વર્ષસહસ્રકમ્ ।
ધ્યાનયુક્તઃ સદા તિષ્ઠન્ જપન્ ઇન્દ્રિયનિગ્રહઃ ॥

એકચિત્તશ્ચ શાન્તાત્મા મમ વાક્યપરાયણઃ ।
તોષિતોઽહં તદા દેવિ ! વરમસ્મૈ પ્રદત્તવાન્ ॥

ત્રિનેત્રઃ શૂલપાણિશ્ચ મમ રૂપસ્વરૂપધૃક્ ।
સપ્તર્ષિભિશ્ચ ભાનુના પરમાર્થવિશારદૈઃ ॥

પ્રાપ્તા તૈઃ પરમા સિદ્ધિરક્ષયા લોકદુર્લભા ।
અન્યૈશ્ચ બહુભિઃ સિદ્ધૈસ્તપસા પુષ્કલેન ચ ॥

અપરે તુ યુગે પ્રાપ્તે વૃદ્ધદેવો મહોદયઃ ।
યત્ર સિદ્ધો મહામેધાઃ સ્વયં દેવો મહેશ્વરઃ ॥

અસ્ય દર્શનમાત્રેણ મુચ્યતે સર્વપાતકૈઃ ।
ક્ષેત્રાધિપં તુ તં વિદ્ધિ સ્વયં તત્ર વ્યવસ્થિતઃ ॥

ઘોરે કલિયુગે પ્રાપ્તે દેવદેવો જગદ્ગુરુઃ ।
લકુલીશ ઇતિ ખ્યાતઃ ત્રિષુ લોકેષુ વિશ્રુતઃ ॥

તત્રસ્થજીવલોકાનાં મુક્ત્યર્થં નૈવ સંશયઃ ।
જ્ઞાનમૂર્ત્તિઃ સ્વયં સાક્ષાદ્દેવદેવો ભવોદ્ભવઃ ॥

આત્મસ્થં ચિન્તય જ્ઞાનં વીતરાગં ચ કેવલમ્ ।
તત્તીર્થં લાકુલં જ્ઞેયં શિવક્ષેત્રમુદાહૃતમ્ ॥

સેવ્યતે દૈવતૈઃ સર્વં ઋષિભિશ્ચ તપોધનૈઃ ।
તપસા સાધિતસ્તૈસ્તુ સુરૈર્બ્રહ્માદિભિઃ પ્રિયે ॥

ઇપ્સિતં પ્રાપ્તવાન્ કાર્યમસ્મિન્ તીર્થે વરાનને ।
તત્ર સ્નાત્વા ચ દત્ત્વા ચ પિતૄણાં તુ તિલોદકમ્ ॥

મુચ્યતે માનવઃ પાપાત્ સપ્તજન્મસમુદ્ભવાત્ ।
સન્દેહો નૈવ કર્તવ્ય ઇતિ શમ્ભુઃ સ્વયમબ્રવીત્ ॥

પ્રયાગે વા ભવેન્મોક્ષો મહાકાલે ચ વા પ્રિયે !
અમરકણ્ટકે તદ્વત્તથા કાયાવરોહણે ॥

મહામાઘીં પુરસ્કૃત્ય સસ્નૌ તત્ર દિનત્રયમ્ ।
અનઘઃ સ્નાનમાત્રેણ સ ભૂત્વેહ દ્વિજોત્તમઃ ॥

અસ્મિન્ યોગે ત્વશક્તોઽપિ સ્નાયાદત્ર દિનત્રયમ્ ।
પતિત્વા બ્રાહ્મણસ્તત્ર બ્રહ્મહા ચાત્મહા ભવેત્ ॥

મુચ્યતે સર્વપાપેભ્યો નાત્ર કાર્યા વિચારણા ।
આશ્વિનસ્ય સિતે પક્ષે ચતુર્દશ્યામુપોષિતઃ ॥

દેવેભ્યશ્ચ પિતૃભ્યશ્ચ કૃત્વા શ્રાદ્ધાદિકાઃ ક્રિયાઃ ।
આશ્વિન્યાશ્ચ સોમયોગે યે કુર્વન્તિ નરોત્તમાઃ ॥

પટ્ટબન્ધં લાકુલીશં સ્વયં દેવૈશ્ચ યત્કૃતમ્ ।
ન તેષાં જાયતે જન્મ સંસારે દુઃખસઙ્કટે ॥

તત્ર મારી ન વર્તેત ન દારિદ્ર્યં ન રોગિણઃ ।
શ્રૂયતામત્ર દેવેશિ ! પુણ્યેઽસ્મિન્ ભૃગુમણ્ડલે ॥

શ્રીમત્કારોહણે તીર્થે પ્રથમં તુ કલૌ યુગે ।
દીર્ઘકાયં તુ દેવેશિ યજ્ઞં યજ્ઞવરોત્તમે ॥

કૃત્વા તુ બ્રાહ્મણાન્ પૂજ્ય (?)દિનાન્યષ્ટાદશૈવ તુ ।
તત્ર કારોહણે દ્વારે વિશ્વે દેવા મહર્ષયઃ ॥

ભોજયેયુર્બ્રાહ્મણાન્ શક્ત્યા યજમાનઃ પિતામહમ્ ।
યો વેદ વિશ્વમદ્રૂપં સ્વયં વિષ્ણુમહેશ્વરમ્ ॥

બ્રાહ્મણઃ શ્રદ્ધયા યુક્તો બ્રહ્મેશ્વરો હ્યજાયત ।
અજૈકપાદા ગન્ધર્વા કિન્નરાશ્ચ તથૈવ ચ ॥

સર્વે દેવાશ્ચ પિતરઃ સચન્દ્રાર્કદિવાકરાઃ ।
મરીચિરઙ્ગિરા અત્રિઃ પુલસ્ત્યઃ પુલહસ્તથા ॥

પ્રચેતાશ્ચ વસિષ્ઠશ્ચ ભૃગુર્નારદ એવ ચ ।
દેવલા ગાલવશ્ચૈવ વામદેવો મહાઋષિઃ ॥

બાલખિલ્યશ્ચ કુશશ્ચ તૃણબિન્દુસ્તથૈવ ચ ।
ઉદ્દાલકો જયચ્છૃઙ્ગો માણ્ડવ્યો વ્યાસનન્દનઃ ॥

ગૌતમોઽથ ભરદ્વાજો વાત્સો વાત્સ્યાયનસ્તથા !
અન્યે ચ બહવો દેવિ ! ઋષયશ્ચ તપોધનાઃ ॥

દૃષ્ટ્વા દેવં વિરૂપાક્ષં આનન્દં પરમં યયુઃ ।
યાનિ કાનિ ચ પુણ્યાનિ તીર્થાનિ સરિતસ્તથા ॥

બ્રહ્માદ્યાઃ સર્વતીર્થેષુ સ્નાત્વા ચૈવ મુદાન્વિતાઃ ।
સ્નાપયેયુઃ શિવં તત્ર પુણ્યૈસ્તીર્થોદકૈઃ પ્રિયે ॥

પ્રથમં સ્નાપયેદ્બ્રહ્મા તતશ્ચૈવ જનાર્દનઃ ।
તતસ્ત્વિન્દ્રોઽપિ દેવેશઃ ચતુર્થો ભાનુરેવ ચ ॥

ચતુર્ભિઃ કલશૈર્દિવ્યૈઃ સ્નાપ્ય દેવં જગદ્ગુરુમ્ ।
વિલેપ્ય ચન્દનૈર્દિવ્યેઃ કર્પૂરાગુરુધૂપકૈઃ ॥

પુષ્પૈર્મનોહરૈર્દિવ્યૈઃ શ્વેતમાલાભિરર્ચિતઃ ॥

પટ્ટસૂત્રમયૈવસ્ત્રૈઃ સૂત્રજૈર્વા મહેશ્વરમ્ ।
પરિધાપ્ય મહાદેવં યથાશક્ત્યા ચ પૂજયેત્ ॥

યાવત્ તદ્વસ્ત્રતન્તૂનાં સઙ્ખ્યાનં શિવપૂજને ।
તાવદ્યુગસહસ્રાણિ શિવલોકે મહીયતે ॥

તે પૂજ્ય વિધિના દેવં સુરા બ્રહ્માદયઃ પ્રિયે ।
હિરણ્મયં તતઃ પટ્ટં ચક્રુર્દેવસ્ય મૂર્ધનિ ॥

પટ્ટબન્ધં તુ યે કુર્યુરેવં દેવસ્ય મૂર્ધનિ ।
ન તેષાં પુનરાવૃત્તિઃ સંસારે જાયતે પ્રિયે ! ॥

શ્રીદેવ્યુવાચ -
કિં પુણ્યં કે ગુણાસ્તસ્ય કિમર્થં કીર્તિતં વિભો !
પટ્ટબન્ધસ્ય માહાત્મ્યં શ્રોતુમિચ્છામિ શઙ્કર ! ॥

શ્રીશઙ્કર ઉવાચ -
સાગરસ્ય તટે રમ્યે પ્રભાસો નામ સુન્દરિ !
સર્વ તીર્થં પ્રભાસાદિ નાત્ર કાર્યા વિચારણા ॥

તત્ર સોમેશ્વરો દેવો સોમેન સ્થાપિતઃ પુરા ।
તસ્ય દ્વાદશમાત્રાભિઃ સમાનં પટ્ટબન્ધનમ્ ॥

સકલૈશ્ચૈવ યોગૈશ્ચ પ્રભાસે યત્પ્રકીર્તિતમ્ ।
તત્ફલં સમવાપ્નોતિ પટ્ટબન્ધં કરોતિ યઃ ॥

કાર્ત્તિકે કૃત્તિકાયોગે કાર્તિક્યાં ષણ્મુખસ્ય ચ ।
દર્શનાત્ સપ્તયાત્રાયાં તત્ફલં નાત્ર સંશયઃ ॥

અયનેઽમરચણ્ડીશે યાત્રાયાં પઞ્ચભિઃ ફલમ્ ।
તત્ફલં કૃતમાત્રેણ નરઃ પ્રાપ્નોતિ પાર્વતિ ! ॥

વૈશાખ્યાં મહાકાલે અઘ અઘ (યચ્ચ)એકાદશીફલમ્ ।
દર્શનેનાપિ ચાશ્વિન્યામિત્યાહુશ્ચ પુરાવિદઃ ॥

યત્ફલં ચ કુરુક્ષેત્રે રાહુણા ગ્રસિતે રવૌ ।
આજન્મગામિનાં નૃણાં તત્ફલં પટ્ટબન્ધને ॥

સોમવારે ત્વમાવસ્યાં ભસ્મગાત્રસ્ય દર્શનાત્ ।
યાત્રાણાં દશકે યચ્ચ તત્ફલં પટ્ટબન્ધનાત્ ॥

વારાણસ્યાં મહાદેવિ ! કાલક્ષેપં કરોતિ યઃ ।
તત્ફલં સમવાપ્નોતિ સકૃદ્વૈ પટ્ટબન્ધનાત્ ॥

ગઙ્ગાયાં સાધયેત્ પુણ્યં ચતુર્યુગેન યન્નરઃ ।
તત્પુણ્યં જાયતે તસ્ય પટ્ટબન્ધં કરોતિ યઃ ॥

કૃષ્ણાજિનસહસ્રાણિ તિલધેનુશતાનિ ચ ।
દત્ત્વા તત્ફલમાપ્નોતિ પટ્ટબન્ધે કૃતે સતિ ॥

મતઙ્ગજસહસ્રં તુ અશ્વાનામયુતં તથા ।

તત્ફલં સમવાપ્નોતિ પટ્ટબન્ધે કૃતે સતિ ॥

સસાગરાં ધરાં દત્વા પુમાન્ યત્ફલમશ્નુતે ।
તત્ફલં સમવાપ્નોતિ પટ્ટબન્ધે કૃતે સતિ ॥

કન્યાકોટિપ્રદાનેન યત્ફલં કવિભિઃ કૃતમ્ ।
વિધિના પટ્ટબન્ધે તુ તત્ફલં લભતે નરઃ ॥

વાપીકૂપસહસ્રાણિ દેવતાયતનાનિ ચ ।
કૃત્વા યત્ફલમાપ્નોતિ તત્ફલ પટ્ટબન્ધનાત્ ॥

માતાપિત્રોર્ગુરૂણાં ચ (યત્ફલ)ભક્તિતો નૃણામ્ ।
તત્ફલં સમવાપ્નોતિ સકૃદ્વૈ પટ્ટબન્ધનાત્ ॥

ગવાર્થે દ્વિજાર્થે ચ સ્વામ્યર્થે યસ્ત્યજેત્ તનુમ્ ।
તત્ફલં સમવાપ્નોતિ પટ્ટ્બન્ધેન પાર્વતિ ! ॥

આપન્નાર્તિહરાણાં ચ તીર્થસેવાર્જિતાત્મનામ્ ।
સત્યવ્રતાનાં યત્પુણ્યં તત્ફલં પટ્ટબન્ધનાત્ ॥

વનાશ્રમેષુ વસતાં તાપસાનાં ચ યત્ફલમ્ ।
તત્ફલં જાયતે તસ્ય પટ્ટબન્ધં કરોતિ યઃ ॥

યસ્તુ વર્ષશતં પૂણમહોરાત્રમુપાસતે ।
એકેન પટ્ટબન્ધેન તત્ફલં લભતે નરઃ ॥

ગાઙ્ગેયં નાર્મદં ચાન્દ્રં પુણ્યં સારસ્વતં જલમ્ ।
કરોતિ પાર્વતિ ! નિત્યં તત્ફલં પટ્ટબન્ધનાત્ ॥

યાનિ કાનિ ચ તીર્થાનિ પુણ્યાન્યાયતનાનિ ચ ।
ભૂતલં સર્વમટતે તત્ફલં પટ્ટબન્ધનાત્ ॥

દુર્લભં જન્મ વિપ્રસ્ય દુર્લભં ચ તથા ધનમ્ ।
દુર્લભઃ પટ્ટબન્ધશ્ચ લકુલીશસ્ય ચ પ્રિયે ! ॥

સ્વલ્પેન હેમ્ના લકુલીશ્વરસ્ય યઃ પટ્ટબન્ધં વિધિવત્ કરોતિ ।
વિધૂતપાપો હિ વિમોદતે સ પ્રસાદમાસાદ્ય મહેશ્વરસ્ય ॥

ય ઇદં લકુલીશસ્ય માહાત્મ્યં શૃણુયાન્ નરઃ ।
તત્પ્રસાદેન તસ્યાસ્તુ ગોસહસ્રાદિકં ફલમ્ ॥

ઇતિ પ્રપન્નાઃ લકુલીશમીશં યે ચારુચામીકરરાશિગૌરં !
સંસ્કારવિધાવ્રતમન્ત્રધૌતં સમાવિશન્તિ પ્રતિગૃહ્યકાયમ્ ॥

ઇતિ શ્રીશિવપુરાણે પાર્વતીમહેશ્વરસંવાદે તીર્થાનુક્રમણિકાયાં
શૂલપાણિજન્મપટ્ટબન્ધાદિમાહાત્મ્યં સમાપ્તમ્ ।

॥ સમાપ્તં કારવણમાહાત્મ્યમ્ ॥

Notes:

KāravaṇaMāhātmyam કારવણમાહાત્મ્યમ્; a.k.a LakulīśaMāhātmyam લકુલીશમાહત્મ્યમ્, describes about the birth of Lakulīśa લકુલીશ / Lakuṭīśa લકુટીશ who is considered to be a Śiva Avatāra શિવ અવતાર closely related to the Pāśupata Sampradāya પાશુપત સમ્પ્રદાય.

Lakulīśa લકુલીશ was born on Caitra Śukla Caturdaśī ચૈત્ર શુક્લ ચતુર્દશી in Kāravaṇa કારવણ / Kāyāvarohaṇa કાયાવરોહણ.

KāravaṇaMāhātmyam કારવણમાહાત્મ્યમ્ also holds the details about the PaṭṭabandhaMāhātmyam પટ્ટબન્ધમાહાત્મ્યમ્, UlkāgrāmaMāhātmyam ઉલ્કાગ્રામમાહાત્મ્યમ્ in this context.

The text of KāravaṇaMāhātmyam કારવણમાહાત્મ્યમ્; a SthalaPurāṇa સ્થલપુરાણ,
is punctuated with brief summaries about (parts of) the chapters - with the first chapter attributed to VāyuPurāṇa વાયુપુરાણ and the remaining three to ŚivaPurāṇa શિવપુરાણ.

Pāśupatasūtra પાશુપતસૂત્ર, that is said to be authored by Lakulīśa લકુલીશ can be accessed from the respective link given below.

Proofread by Ruma Dewan

*Karavanamahatmyam Athava Lakulishamahatmyam*

pdf was typeset on September 2, 2025

Please send corrections to *sanskrit@cheerful.com*